**दिनाङ्क :- 04.04.2025**

**प्रात: - 06:55**

**<u>राज्यसभा-वक्फ धेयकम्</u>**

**संसदा पञ्चविंशत्यधिक-द्विसहस्रतमवर्षीयम् वक्फ-संशोधन-विधेयकं राज्यसभाया: ह्य: स्वीकृते: अनन्तरं पारितम्। अस्मै विधेयकाय उच्चसदनेन स्वीकृति: प्रदत्ता। यस्य पक्षे अष्टाविंशत्यधिकैकशतसङ्ख्यकै: सदस्यै: मतदानं कृतम् तत्रैव पञ्चनवतिसङ्ख्यकै: सदस्या: विधिं विरूध्य मतदानं कृतवन्त:। राज्यसभायां विधेयके एतस्मिन् प्रायश: द्वादशहोराया: चर्चा जाता। लोकसभाया पूर्वमेव विधेयकाय एतस्मै स्वीकृति: प्रदत्ता। अवधेयं वर्तते यत् अस्य विधेयकस्य प्रयोजनं वक्फ-सम्पत्तीनाम् प्रबन्धनम् वर्तते। यस्मिन् रिक्थस्थलानां सुरक्षा-सामाजिक-कल्याणानां संवर्धनस्य प्रावधानमस्ति। एतदतिरिच्य संपत्तिप्रबन्धने पारदर्शितां संवर्ध्य वक्फ मण्डलानां स्थानीयधिकारिणां मध्ये समन्वयं स्थापयित्वा हितधारकाणाञ्च अधिकाराणां रक्षां कृत्वा शासने संशोधनमिति अस्य विधेयकस्य प्रमुखप्रयोजनं विघते। विधेयक साधितप्रश्नानाम् प्रत्युत्तरे अल्पसङ्ख्यक-विषयकमन्त्री किरेन-रिजिजू: उक्तवान् यत् अनेन विधिना कोटिसङ्ख्यका: निर्धना: मुस्लिमजना: लाभान्विता: भविष्यन्ति इति ।**

**<u>संसत्मिणिपुरम्</u>**

**मणिपुरराज्ये राष्ट्रपतिशासनस्य पुष्टिं कुर्वता संसदा: वैधानिक: प्रस्ताव: अङ्गीकृत:। वैधानिक: प्रस्ताव: मणिपुर विषये संविधानस्य अनुच्छेदस्य षड्पञ्चाादधिक-त्रिशतं एकम् इत्येतस्य अन्तर्गतम् अस्मिन् वर्षे फरवरी-मासस्य त्रयोदशदिनाङ्के राष्ट्रपतिना प्रस्तावित-घोषणया सम्बद्धो वर्तते ।**

## प्रधानमन्त्री/ थाईलैंड -देशस्य

**प्रधानमन्त्री नरेन्द्रमोदी अद्य थाईलैंड -देशस्य बैंकॉक-नगरे षष्टमे बिम्स्टेक्-शिखरसम्मेलने भागं ग्रहीष्यति। अस्य सम्मेलनस्य विषयः "बिम्स्टॅक इति समृद्धः, स्थितिस्थापकः तथा च मुक्तः" इत्यस्ति। अत्रावधौ बिम्स्टॅक्-प्रमुख-जन-समूहस्य प्रतिवेदनम् अपि अनुमोदितं भविष्यति येन बिम्स्टॅक्-समूहस्य भविष्यस्य दिशा निर्णीयते। प्रधानमन्त्री मोदी ह्यः थाईलैण्ड-देशस्य द्विदिवसीययात्रायां बैंकॉक-नगरं प्राप्तवान्। असौ थाईलैण्ड देशीयेन स्व-समकक्षीयेण पैतोङ्ग्तार्न् शिनावात्रा इत्यनया सह द्वैपाक्षिकं वार्तालापं कृतवान्। उभौ नेतारौ भारत-थाईलैण्ड-देशयोः मध्ये द्वैपाक्षिकसहयोगस्य सम्पूर्णपरिधिं समीक्षितवन्तौ। बिम्स्टॅक् शिखरसम्मेलनस्य अनन्तरं, प्रधानमन्त्री मोदी अद्य यात्रा या:: द्वितीये चरणे श्रीलङ्कादेशं गमिष्यति। त्रिदिवसीया राज्ययात्रायां श्रीमोदी राष्ट्रपतिना अनुरा कुमार दिसानायके इत्यनेन सह द्वैपाक्षिकं वार्तालापं करिष्यति। प्रधानमन्त्री नरेन्द्रमोदी ब्याङ्काक्-नगरे थाय्ल्याण्ड्-देशस्य पूर्वप्रधानमन्त्री थाक्सिन् शिनावात्रया सह मिलितवान्। सामाजिक-माध्यम-पोस्टे, श्रीमोदी, तेन सह स्वस्य मेलनं आनन्ददायकम् इति वर्णितवान्। सः अपि अवदत् यत् श्री. शिनावात्रा-वर्यस्य शासनविषये नीतिनिर्धारणे च विस्तृतः अनुभवः अस्ति इति। प्रधानमन्त्री अवदत् यत् श्री. शिनावात्रा भारतस्य महान् मित्रम् अपि अस्ति तथा च अटल वर्येण सह अतीव: स्नेहपूर्णः सम्बन्धः आसीत्।**

## आई.पी.एल.स्पर्धा

**आई.पी.एल्.स्पर्धा: इत्येतस्यां क्रिकेट्मालिकायाम् गतरात्रौ कोलकातानगरस्य ईडनगार्डन्सक्रीडाङ्गणे कोलकाता-नाइट-राइडर्स-दलेन सनराइजर्स-हैदराबाद-दलं अशीतिधावनाङ्कैः पराजितम्।**

**।। इति वार्ता:।।**